श्री कृष्णचंद्राष्टकं

श्री कृष्णचंद्राष्टकं

महानीलमेघातिभव्यं सुहासं
शिवब्रह्मदेवादिभिः संस्तुतं च |
रमामंदिरं देवनंदापदाहं
भजे राधिकावल्लभं कृष्णचंद्रं || 1 ||

रसं वेदवेदांतवेद्यं दुरापं
सुगम्यं तदीयादिभिर्दानवघ्नं |
चलत्कुंडलं सोमवंशप्रदीपं
भजे राधिकावल्लभं कृष्णचंद्रं || 2 ||

यशोदादिसंलालितं पूर्णकामं
दृशो रंजनं प्राकृतस्थस्वरूपं |
दिनांते समायांतमेकांतभक्तै-
-र्भजे राधिकावल्लभं कृष्णचंद्रं || 3 ||

कृपादृष्टिसंपातसिक्तस्वकुंजं
तदंतःस्थितस्वीयसम्यग्दशादं |
पुनस्तत्र तैः सत्कृतैकांतलीलं
भजे राधिकावल्लभं कृष्णचंद्रं || 4 ||

गृहे गोपिकाभिर्धृते चौर्यकाले
तदक्ष्णोश्च निक्षिप्य दुग्धं चलंतं |
तदा तद्वियोगादिसंपत्तिकारं
भजे राधिकावल्लभं कृष्णचंद्रं || 5 ||

चलत्कौस्तुभव्याप्तवक्षःप्रदेशं
महावैजयंतीलसत्पादयुग्मं |
सुकस्तूरिकादीप्तभालप्रदेशं
भजे राधिकावल्लभं कृष्णचंद्रं || 6 ||

गवां दोहने दृष्टराधामुखाब्जं
तदानीं च तन्मेलनव्यग्रचित्तं |
समुत्पन्नतन्मानसैकांतभावं
भजे राधिकावल्लभं कृष्णचंद्रं || 7 ||

अदः कृष्णचंद्राष्टकं प्रेमयुक्तः
पठेत्कृष्णसान्निध्यमाप्नोति नित्यं |
कलौ यः स संसारदुःखातिरिक्तं
प्रयात्येव विष्णोः पदं निर्भयं तत् || 8 ||

इति श्रीरघुनाथप्रभु विरचितं श्री कृष्णचंद्राष्टकं ||